## अकृच्छ्रे प्रियसुखयोरन्यतरस्याम्। (१३/२१४८)

प्रिय सुख इत्येतयोः अन्यतरस्यां द्वे भवतः अकृच्छ्रे [1]द्योत्ये। [2]कृच्छ्रं दुःखम्, तदभावः अकृच्छ्रम्। प्रियप्रियेण ददाति। सुखसुखेन ददाति। [3]प्रियेण ददाति। सुखेन ददाति। अखिद्यमानो ददाति इत्यर्थः। अकृच्छ्रे इति किम्? प्रियः पुत्रः। सुखो रथः॥

## यथास्वे यथायथम्। (१४/२१४९)

[4]यो य आत्मा, यद् यदात्मीयम्, तत्तद् यथास्वम्, तस्मिन् यथायथम् इति निपात्यते। यथाशब्दस्य द्विर्वचनं नपुंसकलिङ्गता च निपात्यते। ज्ञाताः सर्वे पदार्थाः यथायथम्। यथास्वभावम् इत्यर्थः। सर्वेषां तु यथायथं यथात्मीयमित्यर्थः॥

## द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु। (१५/२१५०)

द्वन्द्वम् इति द्विशब्दस्य द्विर्वचनम्,[5] पूर्व[6]पदस्याम्भावः, अत्त्वं चोत्तरपदस्य [7]निपात्यते रहस्य मर्यादावचन व्युत्क्रमण यज्ञपात्रप्रयोग अभिव्यक्ति इत्येतेषु अर्थेषु। तत्र रहस्यं [8]द्वन्द्वशब्दवाच्यम्, इतरे विषयभूताः। द्वन्द्वं मन्त्रयते[9]। मर्यादावचने – मर्यादा स्थित्यनतिक्रमः। आचतुरं हीमे पशवो द्वन्द्वं [10]मिथुनीयन्ति। माता पुत्रेण[11] मिथुनं गच्छति, [12]पौत्रेण, तत्पुत्रेणापि इति मर्यादार्थः[13]। व्युत्क्रमणे – द्वन्द्वं व्युत्क्रान्ताः। व्युत्क्रमणं भेदः, पृथगवस्थानम्। द्विवर्गसम्बन्धनेन पृथगवस्थिता द्वन्द्वं व्युत्क्रान्ता इत्युच्यन्ते। यज्ञपात्रप्रयोगे – द्वन्द्वं न्यञ्चि यज्ञपात्राणि प्रयुनक्ति धीरः। अभिव्यक्तौ – द्वन्द्वं नारदपर्वतौ। द्वन्द्वं सङ्कर्षणवासुदेवौ। द्वावप्यभिव्यक्तौ साहचर्येण इत्यर्थः। अन्यत्रापि द्वन्द्वम् इत्येतद् दृश्यते, तदर्थं योगविभागः कर्तव्यः, द्वन्द्वं युद्धं वर्तते[14], द्वन्द्वानि [15]सहते धीरः, 'चार्थे द्वन्द्वः' (२.२.२९/९०१) इति॥

## पदस्य। (१६/४०१)

पदस्य इत्ययमधिकारः प्रागपदान्ताधिकारात् (८.३.५५/२१०)। यद् इत ऊर्ध्वमनुक्रमिष्यामः पदस्य इत्येवं तद् वेदितव्यम्। वक्ष्यति – 'संयोगान्तस्य लोपः' (८.२.२३/५४)। पचन्। यजन्। पदस्य इति किम्? पचन्तौ। यजन्तौ। वक्ष्यमाणवाक्यापेक्षया पदस्य[16] अधिकृतस्य [17]षष्ठ्यर्थव्यवस्था द्रष्टव्या, क्वचित् स्थानषष्ठी, [18]क्वचिदवयवषष्ठी[19]॥

---

1. अर्थे क. इ. ह. 2. वाक्यमिदं नास्ति ड. 3. उदाहरणमिदं नास्ति ह. 4. यथास्वमित्यव्ययीभावो वीप्सायाम्। स्वशब्दः आत्मवचनः आत्मीयवचनश्च इत्यधिकम् क.इ.ड. 5. निपात्यते नपुंसकलिङ्गं च इत्यधिकम् क. ड. इ. 6. पद नास्ति इ. 7. निपात्यते नास्ति इ. 8. द्वन्द्वशब्दस्य इ. 9. द्वौ द्वौ भूत्वा रहस्यं मन्त्रयन्ते इत्यर्थः इत्यधिकम् क. ड. इ. 10. मिथुनाभवन्ति क.इ, मिथुनायन्ते क. ह. फ. 11. समं मैथुनं गच्छति ब. इ. 12. पुत्रेण पौत्रेण तत्पुत्रेणापि मर्यादा भवति ब. क. इ. 13. आचतुरम् इति मर्यादार्थे समासः समासान्तः शरत्प्रभृतिषु प्रक्षेपणात् इत्यधिकम् क. ड. फ. ह. 14. द्वयोः द्वयोः युद्धं वर्तते इत्यर्थः इत्यधिकम् क. ड. इ. 15. सहन्ते धीराः इ, शीतोष्णानि इत्यधिकम् ह, सुखदुःखे इत्यधिकम् ब, क्षुद्तृष्णे इत्यधिकम् ड. 16. इति इत्यधिकम् ब. क. इ. ह. 17. षष्ठ्यर्थे व्यवस्था क. 18. क्वचित् नास्ति इ. 19. इति इत्यधिकम् क. ड.